HMMCW LIBRARY

**WEST BENGAL STATE UNIVERSITY**
B.A. Honours 3rd Semester Examination, 2021-22

## SANACOR07T-SANSKRIT (CC7)

## INDIAN SOCIAL INSTITUTIONS AND POLITY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुप्रबन्धो विरच्यताम्। 5×1 = 5

(क) वर्तमानसमाजव्यवस्थायाः सर्वेषु एव क्षेत्रेषु उन्नत्यर्थं प्राचीनधर्मशास्त्रस्य किं तात्पर्यम् ?

(ख) समाजे बौद्धधर्मस्य कथं सुप्रभावः परिलक्ष्यते ? किमस्ति बौद्धधर्मस्य अन्येभ्यो धर्मेभ्यो वैशिष्ट्यम् तदालोच्यम्।

अथवा

अधोलिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरलिप्या च व्याख्येयः। 5×1 = 5

(क) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥

(ख) धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

2. अधः प्रदत्तेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) याज्ञवल्क्यनये किं धर्मलक्षणम् ?

(ख) मनुना यो धर्मः परिकीर्तितः तत्सर्वं कुत्र अभिहितम् ?

(ग) पुराणस्य पञ्चलक्षणानि कानि ?

(घ) धर्मशब्दस्य व्युत्पत्तिगतः कः अर्थः ?

(ङ) कति वेदाङ्गानि ? तानि वेदपुरुषस्य केन केनाङ्गेन तुलितानि ?

(च) मिताक्षरा केन विरचिता ? मन्वर्थमुक्तावली केन विरचिता ?

(छ) महाभारतस्य रचयिता कः ? अस्मिन् ग्रन्थे कति पर्वाणि सन्ति ?

### ख-विभागः

3. यथेच्छमेकः प्रश्नः संस्कृतेन देवनागरलिप्या च समाधेयः। 10×1 = 10

(क) ऋग्वदीयपुरुषसूक्तं तथा महाभारतस्य स्त्रीपर्व समाश्रित्य चतुर्वर्णव्यवस्थाविषये प्रबन्धः रचनीयः।

(ख) आ-वैदिकयुगात् समाजे नारीणाम् अवस्थितिः वर्णनीया।

4. प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×1 = 5

(क) जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्॥

(ख) शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान्श्रेयसीं जातिं गच्छत्या-सप्तमाद्युगात्॥

अथवा

अधोलिखितेषु यथेच्छमेकमाश्रित्य टिप्पनी लेख्या। 5×1 = 5

(क) शूद्रः, (ख) अन्नप्राशनसंस्कारः, (ग) मोक्षः।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) वैदिकरीतिं समाश्रित्य राज्ञः अभिषेकः वर्णनीयः।

(ख) राजकार्यावेक्षणे सप्ताङ्गतत्त्वस्य गुरुत्वं वर्णनीयम्।

6. यथेच्छं द्वितयस्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×2 = 10

(क) राजधर्मः, (ख) सत्याग्रहः, (ग) विग्रहः, (घ) आसनम्।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(ख) अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम्।
सम्प्रमोदमलः कामो भूयः स्वगुणवर्जितः॥

(ग) श्रेष्ठा बुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयान्नरः।
कर्मणा बुद्धिपूर्वेण भवत्यर्थो न वा पुनः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——